स्यते। कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः। पिबेयुस्तैलसात्म्याश्च तैलं दार्ढ्यार्थिनस्तु ये। व्यायामकर्षिताः शुष्करेतोरक्ता महारुजाः"। क्रूराशयाः क्रूरकोष्ठाः सर्वतः सर्वस्मात् स्नेहात्। "शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि। वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा। नस्याभ्यञ्जनगण्डूषमूर्द्धकर्णाक्षितर्पणे। तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम्। घृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते। वसामज्ज्ञोः पिबेन्मण्डमनुपानं सुखावहम्। स्नेहद्विषः शिशून् वृद्धान् सुकुमारान् कृशानपि। तृष्णालुकानुष्णकाले सह भक्तेन पाययेत्। सर्पिष्मती बहुतिला यवागूः स्वल्पतण्डुला। सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी। शर्कराचूर्णसंयुक्ते दोहनस्थे घृते तु गाम्। दुग्ध्वा क्षीरं पिबेद्रूक्षः सद्यः स्नेहनमुत्तमम्। मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्य्यति। विष्टभ्य वापि जीर्य्येत वारिणोष्णेन वामयेत्। स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः। तदोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा। स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः। तदासौ दीर्य्यते तृष्णा विषमा तस्य पाययेत्। शीतलं पायसं, तेन तृष्णा तस्य प्रशाम्यति। दुर्बलोऽरोचकी स्थूलो मूर्च्छालुर्मेहपीडितः। दत्तवस्तिर्विरिक्तश्च वान्तस्तृष्णाश्रमान्वितः। अकालप्रसवा नारी दुर्दिने च विवर्जयेत्। स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तचित्तकाः। वृद्धबालकृशा रूक्षाः क्षीणास्राः क्षीणरेतसः। वातार्त्तास्तिमिरार्त्ता ये तेषां स्नेहनमुत्तमम्। वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्। मृदुस्निग्धाङ्गता ग्लानिः स्नेहद्वेषोऽथ लाघवम्। विमलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्य्ययः। भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिका। तन्द्रातीसारखण्डत्वं भृशं स्निग्धस्य लक्षणम्। रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्। श्यामाकचणकाद्यैश्च तिलपिण्याकसक्तुभिः। दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः। निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः। स्नेहे व्यायामसंशीतवेगाघातप्रजागरान्। दिवास्वप्नमभिष्यन्दि रूक्षान्नञ्च विवर्जयेत्"। करणे-ल्युट्। स्नेहसाधने त्रि०। स्त्रियां ङीप्। उदा० अत्रैव दृश्यम्।

**स्नेहप्रिय** पु० स्नेहः तैलादिः प्रियोऽस्य। प्रदीपे हेमच०।

**स्नेहभू** स्त्री ६त०। १श्लेष्माख्ये देहस्थे धातुभेदे हेमच० २स्नेहपात्रे च शब्दर०। [शब्दच०।

**स्नेहरङ्ग** पु० स्नेहेन रज्यते रन्ज-कर्मणि घञ्। तिले

**स्नेहवत्** त्रि० स्नेहोऽस्त्यस्य मतुप् मस्य वः। १स्नेहयुक्ते स्त्रियां ङीप्। सा च २मेदायां पुंस्त्री० राजनि०।

**स्नेहविद्ध** न० स्नेहेन विद्धम्। देवदारुणि जटा०।

**स्नेहवस्ति** स्त्री स्नेहपूरिता वस्तिः। तैलादिस्नेहयुतद्रव्यपूरिते अनुवासनाख्ये पदार्थे (पिचकारी) वस्तिशब्दे ४८६४ पृ० दृश्यम्। [६त०। २स्नेहकारणे न०।

**स्नेहवीज** पु० स्नेहाढ्यं वीजमस्य। पियालवृक्षे राजनि०।

**स्नेहाश** पु० स्नेहमश्नाति अश-अण्। प्रदीपे त्रिका०।

**स्नेहिन्** पु० स्निह-णिनि। १वयस्ये बन्धौ त्रिका०। २स्नेहयुक्ते त्रि० स्त्रियां ङीप्।

**स्नेहु** पु० स्निह-उन्। रोगभेदे उणा०को० २चन्द्रे संक्षिप्त०

**स्पद** ईषत्कम्पे भ्वा० आ० अक० सेट् इदित्। स्पन्दते अपस्पन्दिष्ट स्पन्दितम्।

**स्पन्द** पु० स्पदि-घञ्। १ईषच्चलने ईषत्कम्पे २क्रियाभेदे च। ल्युट्। तत्रार्थे न०। नेत्रस्पन्दादौ शुभाशुभविवेचनं मत्स्यपु० २४१ अ० उक्तं यथा

"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च। सर्वधर्मभृतां श्रेष्ठ! त्वं हि सर्वविदुच्यसे" मत्स्य उवाच "अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत्। अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च"। मनुरुवाच "अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम्। तन्मे विस्तरतो ब्रूहि येन स्यान्त्रिदिवो भुवि"। मत्स्य उवाच "पृथ्वीलाभो भवेन्मूर्ध्नि ललाटे रविनन्दन!। स्थानं विवृद्धिमायाति भ्रूनसोः प्रियसङ्गमः। भृत्यलब्धिश्चाक्षिदेशे दृगुपान्ते धनागमः। उत्कण्ठोपागमो मध्ये दृष्टे राजन्! विचक्षणैः। दृग्बन्धने सङ्गरे च जयं शीघ्रमवाप्नुयात्। योषिद्भोगोऽपाङ्गदेशे श्रवणान्ते प्रियाश्रुतिः। नासिकायां प्रीतिसौख्यं प्रजाप्तिरधरोष्ठजे। कण्ठे तु भोगलाभः स्याद्भोगवृद्धिरथांसयोः। सुहृत्स्नेहश्च बाहुभ्यां हस्ते चैव धनागमः। पृष्ठे पराजयः सद्योऽजयो वक्षःस्थले भवेत्। कुक्षिभ्यां प्रीतिरुद्दिष्टा स्त्रियाः संजननं स्तने। स्थानभ्रंशो नाभिदेशे अन्त्रे चैव धनागमः। जानुसन्धौ जातसन्धिर्बलवद्भिर्भवेन्नृपः। देशैकदेशनाशोऽथ जङ्घायां रविनन्दन!। उत्तमं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप!। सलाभञ्चाध्वगमनं भवेत् पादतले नृप!। लाञ्छनं पिटकञ्चैव ज्ञेयं स्फु-